
**अष्टमः पाठः**

# सद्वृत्तम्



**आयुर्वेदः न केवलं विशिष्टा चिकित्सापद्धतिः अपितु जीवनदर्शनम् अपि अस्ति। आयुर्वेदे वर्णिताः सिद्धान्ताः जीवनशैलीमपि प्रदिशन्ति। आयुर्वेदोपदेशानुसारम् आचरणं कृत्वा नरः अस्मिन् लोके स्वास्थ्यलाभम् अनुभूय मोक्षं याति। अतः स्वास्थ्यशिक्षायै चरकसंहितायाः इन्द्रियोपक्रमोक्तस्य सद्वृत्तस्य वर्णनं पाठे प्रदत्तम्।**

आत्महितं चिकीर्षता सर्वेण सर्वं सर्वदा स्मृतिमास्थाय सद्वृत्तमनुष्ठेयम्। तद्धि सद्वृतम् अनुतिष्ठन् मानवः युगपत् अर्थद्वयं सम्पादयति आरोग्यम् इन्द्रियविजयं च। तत् यथा - देवगोगुरुवृद्धसिद्धाचार्यानर्चयेत्। नानृतं ब्रूयात्। नान्यस्वमाददीत। न वैरं रोचयेत्। न कुर्यात् पापम्। न पापेऽपि पापी स्यात्। नान्यदोषान् ब्रूयात्। नान्यरहस्यमागमयेत्। न द्रुममारोहेत्। न जलोग्रवेगमवगाहेत्। नोच्चैर्हसेत्। न अनावृतमुखो जृम्भां क्षवयुं हास्यं वा प्रवर्तयेत्। न दन्तान् विघट्टयेत्। न नखान् वादयेत्। न एकः शून्यगृहं न च अटवीमनुप्रविशेत्। नोत्तमैर्विरुध्येत्। न अवरानुपासीत्। न साहसातिस्वप्नप्रजागरस्नानपानान्यासेवेत। न अस्नातः नोपहतवासा न अजपित्वा न आहुत्वा देवताभ्यो नानिरूप्य पितृभ्यो नादत्वा गुरुभ्यो नातिथिभ्यो नोपाश्रितेभ्यो नाप्रक्षालितपाणिपादवदनः नाशुद्धमुखः नोदङ्मुखः न विमना न पात्रीष्वमेध्यासु न कुत्सयन्न कुत्सितं न प्रतिकूलोपहितम् अन्नमाददीत। न नक्तं दधि भुञ्जीत।

न स्त्रियमवजानीत। न सन्ध्ययोर्नामुखाद्गुरोर्नावपतितं नातिमात्रं न तान्तं न विस्वरं नानवस्थितपदं नातिद्रुतं न विलम्बितं नातिक्लीबं नात्युच्चैर्नातिनीचैः स्वरैः अध्ययनमभ्यस्येत्। नातिसमयं जह्यात्। न नियमं भिन्द्यात्। न नक्तं नादेशे चरेत्। न सन्ध्यास्वभ्यवहारस्वप्नसेवी स्यात्। न बालवृद्धलुब्धमूर्खक्लिष्टैः सह सख्यं कुर्यात्। न गुह्यं विवृणुयात्। न कञ्चिदवजानीयात्। न गवां दण्डमुद्यच्छेत्। न वृद्धान् न गुरून् न गणान् न नृपान् वाऽधिक्षिपेत् न चाति ब्रूयात्। न बान्धवानुरक्तकृच्छ्रद्वितीयगुह्यज्ञान् बहिष्कुर्यात्।

नाधीरो नात्युच्छ्रितसत्वः। नाविश्रब्धस्वजनः नैकः सुखी न दुःखशीलाचारोपचारः न सर्वविश्रम्भी न सर्वाभिशङ्की न सर्वकालविचारी स्यात्। न कार्यकालमतिपातयेत्। न चञ्चलं मनोऽनुभ्रामयेत्। न चातिदीर्घसूत्री स्यात्। न क्रोधहर्षावनुविदध्यात्। न शोकमनुवसेत्। न सिद्धावुत्सेकं गच्छेत् नासिद्धौ दैन्यम्। नापवादमनुस्मरेत्। ब्रह्मचर्यज्ञानदानमैत्रीकारुण्यहर्षोपेक्षाप्रशमपरश्च स्यात् इति।

*स्वस्थवृत्तं यथोद्दिष्टं यः सम्यगनुतिष्ठति।*
*स समाः शतमव्याधिरायुषा न वियुज्यते॥*

## शब्दार्थ:

आत्महितम् - अपना हित। चिकीर्षता - चाहने वाले के द्वारा। स्मृतिमास्थाय - स्मृतिपूर्वक। सद्‌वृत्तम् - शुभ आचरण/सज्जनों का आचरण। अनुष्ठेयम् - व्यवहार करना चाहिए। युगपत् - एकसाथ। आरोग्यम् - आरोग्य लाभ। अनृतम् - झूठ। स्वम् - धन। पापेऽपि - पाप करने वाले के साथ भी। न आगमयेत् - जानने का प्रयत्न नहीं करना चाहिए। अनावृतमुखः - मुख खोले हुए। जृम्भाम् - जँभाई को। क्षवयुम् - छींक को। न विघट्टयेत् - न किट-किटाये। अटवीम् - वन को/में। उत्तमैः - महापुरुषों से। अवरान् - नीचों को/की, दुष्टों को/की। साहसम् - अपनी शारीरिक क्षमता से अधिक कायिक,वाचिक मानसिक श्रम। अस्नातः - विना स्नान किये। नोपहतवासा - बिना शुद्ध वस्त्र धारण किये। नानिरूप्य - भोग लगाए बिना। नादत्त्वा - बिना दिये। नोदङ्मुखः - बिना उत्तर दिशा को मुख किये। पात्रीष्वमेध्यासु - गन्दे/अपवित्र पात्रों में। कुत्सयन् - निन्दा करते हुए। कुत्सितम् - निन्दित (भोजन)/बासी/अपत्थ्य अन्न। प्रतिकूलोपहितमन्नम् - प्रतिकूल (शत्रु) पुरुष के द्वारा दिया गया अन्न। नक्तम् - रात्रि में। न स्त्रियमवजानीत - स्त्री का अपमान न करे। नातिमात्रम् - अधिक वर्ण या अधिक मात्रा युक्त वाक्य। नावपतिम् - हीन वर्ण युक्त वाक्य। विस्वरम् - स्वर रहित। अनवस्थितपदम् - प्रत्येक पद का अनियमित पाठ। तान्तम् - रूक्ष स्वर। नातिक्लीबम् - न अति विलम्बित स्वर से/न अत्यन्त धीरे से। नादेशे - अपरिचित स्थान में। अभ्यवहारः - भोजन। स्वप्नसेवी - शयन करने वाला। क्लिष्टः - क्लेश युक्त/कलह युक्त/निन्दित। न गुह्यं विवृणुयात् - किसी की गुप्त बातों का व्याख्यान न करे। गणान् - गण/जन समूह को। न अधिक्षिपेत् - दोषारोपण न करे। न चाति ब्रूयात् - अपमानित करने आदि के लिए बहुत न बोलें। न अवजानीयात् - अपमान न करे। कृच्छ्रद्वितीयः - आपत्ति काल में सहायक। गुह्यज्ञानम् - गुप्त बातों को जानने वालों को। उच्छ्रितसत्वः - उद्धत स्वभाव वाला। सर्वविश्रम्भी - सभी पर विश्वास करने वाला। दीर्घसूत्री - अधिक विलम्ब से कार्य करने वाला। सिद्धावुत्सेकम् - कार्य के सिद्ध/सफल हो जाने पर अत्यन्त उत्सुक/प्रसन्नता को। अपवादम् - निन्दा को। प्रशमपरः - शान्तिपरक। समाः - वर्ष (बहुवचन)।

## अभ्यासः

1. **एकपदेन उत्तरं लिखत -**

(क) आत्महिताय किम् अनुष्ठेयम् ?

(ख) किं न रोचयेत् ?

(ग) कुत्र न आरोहेत् ?

(घ) कान् न विघट्टयेत् ?

(ङ) कदा दधि न भुञ्जीत ?

**2. एकवाक्येन उत्तरं लिखत –**

(क) कान् न वादयेत् ?

(ख) कैः न विरुध्येत् ?

(ग) कं न भिन्द्यात् ?

(घ) कं न अतिपातयेत् ?

(ङ) कं न अनुवसेत् ?

**3. अधोलिखितप्रश्नानाम् उत्तराणि लिखत –**

(क) सद्वृत्तेन मानवः किं सम्पादयति ?

(ख) कथं न अध्ययनम् अभ्यस्येत् ?

(ग) अन्नं कथं न आददीत ?

**4. प्रदत्तशब्दैः रिक्तस्थानानि पूरयत –**

(नादेशे, नातिसमयं, पापेऽपि, विवृणुयात्, गवां)

(क) न .................................. पापी स्यात्।

(ख) न नक्तं .............................. चरेत्।

(ग) ........................................ जह्यात्।

(घ) न ..................................... दण्डमुद्यच्छेत्।

(ङ) न गुह्यं ..................................... ।

**5. यथायोग्यं योजयत –**

| 'अ' | 'आ' |
| --- | --- |
| (क) न उदङ्मुखः | न कुर्यात् |
| (ख) नानृतम् | न स्यात् |
| (ग) बालैः सह सख्यम् | दैन्यम् |
| (घ) दीर्घसूत्री | अन्नं न आददीत |
| (ङ) नासिद्धौ | ब्रूयात् |

**6. शुद्धवाक्यानां समक्षम् "आम्" अशुद्धवाक्यानां समक्षम् "न" इति लिखत –**

(क) देवगोगुरुवृद्धसिद्धाचार्यानर्चयेत्। ☐

(ख) एकः शून्यगृहम् अनुप्रविशेत्। ☐

(ग) अस्नातः अन्नम् आददीत। ☐

(घ) सर्वकालविचारी न भवेत्। ☐

(ङ) चञ्चलं मनः न अनुभ्रामयेत्। ☐

7. **निम्नलिखितशब्दानां मूलशब्दं विभक्तिं वचनं च लिखत -**

| शब्दः | मूलशब्दः | विभक्तिः | वचनम् |
|---|---|---|---|
| यथा - नृपान् | नृप | द्वितीया | बहुवचनम् |
| (क) गुरून् | | | |
| (ख) गवाम् | | | |
| (ग) सर्वेण | | | |
| (घ) उत्तमैः | | | |
| (ङ) असिद्धौ | | | |

8. **क्रियापदानां धातुं लकारं च पृथक् कुरुत -**

| क्रियापदम् | धातुः | लकारः |
|---|---|---|
| यथा - हसेत् | हस् | विधिलिङ्लकारः |
| (क) चरेत् | | |
| (ख) गच्छेत् | | |
| (ग) रोचयेत् | | |
| (घ) वादयेत् | | |
| (ङ) अर्चयेत् | | |

9. **अधोलिखितपदानां सन्धिविच्छेदं कृत्वा सन्धिनाम लिखत -**

| पदम् | सन्धिविच्छेदः | सन्धिनाम |
|---|---|---|
| यथा - नाधीरः | न + अधीरः | दीर्घस्वरसन्धिः |
| (क) नोपहतवासा | | |
| (ख) नोदङ्मुखः | | |
| (ग) चाति | | |
| (घ) नोच्चैः | | |
| (ङ) सिद्धावुत्सेकम् | | |

10. **विपरीतार्थिशब्दान् लिखत -**

**यथा - गुरुः** **शिष्यः**

(क) पिता

(ख) प्रतिकूलम्

(ग) पापम्

(घ) दोषः

(ङ) सिद्धिः

**योग्यताविस्तारः -**

- स्वास्थ्यहिताय उपदेशयुक्ताः अन्याः रचनाः पठत।
- पाठे आगताः शिक्षाः आचरणीयाः।